International Journal of Sanskrit Research 2015; 1(6): 29-30

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2015; 1(6): xx-xx
© 2015 IJSR
www.sanskritjournal.com
Received: 17-07-2015
Accepted: 19-08-2015

**प्रियंका खण्डेलवाल**
सीनियर रिसर्च फेलो, विक्रम विश्वविद्यालय,उज्जैन (म.प्र.)

**Correspondence**
**प्रियंका खण्डेलवाल**
सीनियर रिसर्च फेलो, विक्रम विश्वविद्यालय,उज्जैन (म.प्र.)

# पञ्चमो वेदः

## प्रियंका खण्डेलवाल

संस्कृतसाहित्ये नाट्यशास्त्रम् महनीयं स्थानं भजते। महामुनिना भरताचार्येण प्रणीतं नाट्यशास्त्रं नाट्यालङ्कारविषयकं प्राचीनतमं ग्रन्थरत्नं विद्यते। नाट्यशास्त्रस्य बीजं भरतेन वेदेभ्यः समुपलब्धं। भारतीये वाङ्मये चत्वारो वेदाः ज्ञानस्य निधिभूताः विलसन्ति। वेदेभ्यः नाटकीयतत्त्वान् समादाय पितामहेन ब्रह्मणा नाट्यशास्त्रस्य रचना कृता इति स्वयमेव वदति भरतमुनिः। तथा हि–

**जग्राह पाठ्यमृग्वेदात् सामेभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**
**वेदोपवेदैः सम्बद्धो नाट्यवेदो महात्मना।**
**एवं भगवता स्रष्टो सर्ववेदिना।।**

एवमेव पाठ्यप्रधाना भारती, अभिनयप्रधाना सात्त्वती, अनुभावाद्यावेशमय– रसप्रधाना आरभटी, गीतवाद्योपरंजनप्रधाना कैशिकी इति चतस्रो वृत्तयोऽपि वेदेभ्य एव संगृहीताः

**ऋग्वेदाद् भारती क्षिप्ता यजुवेदाच्च सात्त्वती।**
**कैषिकी सामवेदाच्च शेषा चाथर्वणादपि।।**

अनेन सुस्पष्टं ज्ञायते नाट्यशास्त्रस्य वेदत्वम्। अतएव शास्त्रमिदं नाट्यवेद इत्यपि कथ्यते। अस्य शास्त्रस्य वेदस्वरूपत्वात् सर्वज्ञानमयत्वं सिद्धमेव। तथा चोक्तं भरतमुनिना–

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**नासौ योगो न तत्कर्म नाट्येऽस्मिन् यन्न दृश्यते।।**

मुनिना भरतेन प्रणीतस्य नाट्यशास्त्रस्य आरम्भिके भागे नाट्यवेदोत्पत्तिविषयिणी एका कथा समुपलभ्यते। एकदा भरतमुनिः शान्तचित्तेन भावेन निविष्टः आसीत्। आत्रेयप्रमुखाः मुनयः तत्र समायाताः। तै मुनिभिः उक्तं– भगवन्! भवता वेदसम्मितः यः नाट्यवेदो विनिर्मितः, तस्य उत्पत्ति कथं जाताः? कस्य कृते नाट्यवेदस्य निर्माणः कृतः? कश्च तस्य निर्माणे हेतुः? कति अंगानि नाट्यवेदस्य? परिमाणंच कियत्? कथं चास्य प्रयोगः क्रियते?
भरतेन नाट्यवेदोत्पित्तिविषये उक्तं– त्रेतायुगस्य आरम्भकाले जनेषु रजोगुणप्रवृत्ति परिवर्द्धिता आसीत्। कामलोभादिवशीभूताः जनाः ग्राम्यधर्मे प्रवृत्ता बभुवुः। ईर्ष्याक्रोधादिमदान्धीकृताः लोकाः दुःखमनुभूय खिन्नाः संजाताः। तस्मिन् काले इन्द्रप्रमुखैः देवैः पितामहो ब्रह्मा निवेदितः– भगवन्! वयं सर्वे ईदृशं किमपि क्रीड़नीयकमिच्छामः, यद् दृश्यं श्रव्यं च भवेत्। कृपया सार्ववर्णिकः कश्चन् पंचमो वेदः रचनीयः इति। पितामहेन 'एवमस्तु' इति उक्त्वा सङ्कल्पितं यदहं धर्मार्थयशः साधनम्, उपदेशात्मकं, शास्त्रज्ञानसमन्वितं, समस्तकर्मानुदर्शकं, सर्वशास्त्रार्थसम्पन्नं, समस्तशिल्पप्रदर्शकं, सेतिहासं नाट्यवेदं रचयामि। ततश्च तत्त्ववित् पितामहः योगमास्थाय चतुरो वेदान् सस्मार।
ऋग्वेदात् कथनोपकथनादिरूपं पाठ्यं, सामवेदात् गीतं, यजुर्वेदात् अभिनयान्, अथर्ववेदाच्च रसान् समादाय पंचमवेदरूपोऽयं नाट्यशास्त्रनामको ग्रन्थः ब्रह्मणा विनिर्मितः। अस्मिन् हि शास्त्रे नाट्यशास्त्रस्य प्राधान्येऽपि तत्सम्बन्धि–अलंकार–संगीत–छन्दः शास्त्राणामपि मौलिकाः सिद्धान्ताः प्रपंचिताः। शास्त्रमिदं षट्त्रिंशदध्यायात्मकं पंचसहस्त्रमितैः श्लोकैरूपनिबद्धमनुष्टूप्छन्दोबद्धं, केवलं षष्ठे सप्तमे अष्टाविंशतितमेऽध्याये च गद्यमयं विलसति।

ग्रन्थेऽस्मिन् नाट्योत्पत्तिः, प्रेक्षागृहनिर्माणविधिः, रङ्गदैवतपूजनं, अमृतमन्थनादिरूपकाभिनयः, पूर्वरङ्ग–नान्दी–प्रस्तावनादीनां लक्षणानि, रसनिरूपणं, भाव–विभाव–अनुभाव–व्यभिचारिभाव–सात्त्विकभावादीनां स्वरूपम्, सात्त्विकाङ्गिवाचिकाहार्यरूपाः चतुर्विधाः अभिनयाः, भारतीप्रभृतयो वृत्तयः, छन्दोवृत्तयः, दोष–गुणालंकाराः, रूपकलक्षणं, कथावस्तुभेदाः, नायिकावस्थाः, नायकनायिकाभेदाः, आतोद्यविद्यानं, गायकवादकादीनागुणदोषाः, पात्राणाम् भूमिकाव्यवस्था, नाट्यमाहात्म्यादिविषयाश्च सविस्तरं निरूपिताः सन्ति।
नाट्यशास्त्रापरनामकं नाट्यवेदेऽस्मिन् लोकधर्मप्रवृत्तानि शास्त्राणि, धर्माः, शिल्पानि, विविधाः कियाश्च महामुनिना भरतेन समन्विताः। किम् नाम नाट्यं? इति प्रश्नमुत्तरयन् भरतमुनिर्वदति–

**लोकस्य चरितं यत्तु नानावस्थान्तरात्मकम्।**
**तदङ्गाभिनयोपेतं नाट्यमित्यभिसंज्ञितम्।।**
**यानि शास्त्राणि ये धर्माः यानि शिल्पानि याः क्रिया।**
**लोकधर्मप्रवृत्तानि तन्नाट्यमिति संज्ञितम्।।**
**योऽयं स्वभावो लोकस्य सुखदुःखसमन्वितः।**
**अङगाद्यभिनयोपेतः नाट्यमित्यभिधीयते।।**

**सन्दर्भ**

1. नाट्यशास्त्र–भरतमुनि